# श्रीमद्भगवद्गीतोपदिष्टगुरुतत्त्वस्य सिद्धसिद्धान्तपद्धत्यां समन्वयः

**Sudhanshu Kumar Tiwari**
Dept. of Vaidic Darshan
Faculty of SVDV
Banaras Hindu University, Varanasi, India
Email: skyoga@bhu.ac.in

**Abstract:** भारतीयतत्त्वपरम्परायां गुरुतत्त्वस्य विशेषस्थानं वर्तते। विशेषतः नाथयोगसम्प्रदायस्य ग्रन्थेषु सिद्धसिद्धान्तपद्धत्यां गुरुः न केवलम् आध्यात्मिकमार्गदर्शी, अपि तु साक्षात् शिवस्वरूपः परंकारणं च परिगणितः। अस्मिन्ग्रन्थे गुरोः विना परमपदप्राप्तिर्न सम्भवेत्येव प्रतिपाद्यते । श्रीमद्भगवद्गीता अपि भगवतः श्रीकृष्णस्य माध्यमेन अर्जुनाय उपदिष्टा या अस्ति, तस्यामपि गुरुतत्त्वस्य महान् महत्वं निरूप्यते, अतः तत्त्वेऽस्मिन् योगमार्गस्य रहस्यं निहितम्। सिद्धसिद्धान्तपद्धत्यामपि हठयोगस्य आधाररूपेण गुरोः अतीव महत्त्वं प्रतिपादितम्। अत्र लेखे उभयोः ग्रन्थयोः मध्ये गुरुतत्त्वस्य समन्वयात्मकं चिन्तनं समुपस्थाप्यते ।

**Keywords:** श्रीमद्भगवद्गीता, सिद्धसिद्धान्तपद्धतिः, गुरुतत्त्वम्, गुरुप्रसादः, उपदेशतत्त्वम्, मोक्षोपायः, गुरुकृपा।

**श्रीमद्भगवद्गीतायां गुरुत्त्वम् —**

श्रीमद्भगवद्गीता अर्जुनस्य विषादे प्रारब्धा, यत्र अर्जुनः मोहाविष्टो न युद्धं कर्तुं शक्नोति । अत्र भगवान् कृष्णः साक्षात् गुरुरूपेण उदितः — "शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्"[1] — इत्यनेन अर्जुनः गुरुं विना आत्मदृष्टिं विना यथार्थ निर्णयं न कर्तुं शक्नोतीति स्पष्टं दृश्यते। कृष्णः केवलं युद्धमार्गदर्शी न, अपि तु आत्मविवेकद्रष्टा, निष्कामकर्मयोगस्य उपदेष्टा च। श्रीमद्भगवद्गीता गुरोः लक्षणं स्पष्टयति — "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥"[2] इति श्लोकोऽयं दर्शयति यः शिष्यः विनयं, सेवाभावं च धत्ते, स एव तत्त्वदर्शिनां ज्ञानीनां समीपे ज्ञानं लभते।

**सिद्धसिद्धान्तपद्धतेः सामान्यसारः —**

"सिद्धासिद्धान्तपद्धतिः" गोरखनाथकृता एकः प्रमुखः ग्रन्थः, यः नाथसम्प्रदायस्य तात्त्विक-योगिक दार्शनिकसिद्धान्तानां विशदं निरूपणं करोति। ग्रन्थेऽस्मिन् षट् अध्यायाः सन्ति, येषां नाम "उपदेशः" इत्यत्र स्थापितमस्ति। अयं ग्रन्थः हठयोग-नाथयोगपरम्परायाः मूलग्रन्थरूपेण स्वीक्रियते। अनेन माध्यमेन नाथसम्प्रदायस्य गुरुशिष्यपरम्परा, शारीरचक्राणि, प्राणायामः, ध्यानम्, समाधिः, मोक्षमार्गश्चविस्तरेण वर्णिताः सन्ति।

**गुरुतत्त्वम्—**

गोरक्षनाथकृतायां सिद्धसिद्धान्तपद्धत्यां गुरोः स्थानं सर्वोपरि विद्यते। ग्रन्थस्य प्रारम्भ एव गुरुपूजया आरभ्यते—

"आदिनाथं नमस्कृत्य शक्तियुक्तं जगद्गुरुम्। वक्ष्ये गोरक्षनाथोऽहं सिद्धसिद्धान्तपद्धतिम्"॥[3] इत्यादिना। अत्र गुरुं साक्षात् शिवस्वरूपं, सृष्टिकर्तारं च घोषितम्। हठयोगस्य सिद्ध्यर्थं गुरुशरणं, गुरुसेवा, गुरुवाक्यश्रद्धा— एतानि अनिवार्यत्वेन प्रतिपादितानि। गुरोः वर्णनम्— "कथनाच्छक्तिपाताद्वा यद्वा पादावलोकनात्। प्रसादात् स्वगुरोः सम्यक् प्राप्यते परमं पदम्"॥[4] इत्यनेन गुरोः ब्रह्मस्वरूपता

प्रतिपाद्यते। मुण्डकोपनिषदि— "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" ॥[5]

ब्रह्मविद्याप्राप्त्यर्थं शिष्यः सम्यग्भावेन गुरुमेव सम्प्राप्तव्यः। स गुरुः श्रोत्रियश्च भवेत्-यः वेदाध्ययनसम्पन्नः, ब्रह्मनिष्ठश्च-यः साक्षात् ब्रह्मवस्तुनि स्थितः, आत्मसाक्षात्कारवान्। शिष्यः समित्पाणिः सन्-समिद्धारुद्वयेन हस्ते, विनययुक्तः सेवाभावसमन्वितश्च, तं गुरु प्राप्नुयात्। तैत्तिरीयोपनिषदि— "आचार्यदेवो भव।"[6] योगसूत्रे यथा— "पूर्वेषाम् अपि गुरुः कालेनानवच्छेदात्।"[7] स एव ईश्वरः पूर्वोत्पन्नगुरूणामपि गुरुर्भवति, यतः सः कालेन अनवच्छेदात् सर्वदा वर्तमानः अस्ति। गुरोः मुखात् निष्पन्नमेव ज्ञानं सार्थकम्— "तज्ज्ञेयं सगुरोर्वक्त्रात् नान्यथा शास्त्रकोटिभिः।"[8] यः उपदेशः साक्षात् गुरोः मुखात् निष्पन्नः, स एव परमपदप्राप्तेः कारणम्। शास्त्राणां कोटिशः अध्ययनं यदि गुरोः उपदेशवर्जितं भवति, तर्हि तत् निष्फलमेव। अयमेव भावः श्रीमद्भगवद्गीतायां प्रतिपाद्यते— "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥"[9] अत्र विनयपूर्वकं प्रणिपातं, प्रश्नं, सेवां च कृत्वा गुरुजनात् आत्मज्ञानं लभ्यते इत्युक्तम्। अतो ज्ञानस्य मूलाधारः गुरुः एव। श्रवण मनन तर्क ध्यान-जपादयः अपूर्णाः गुरुप्रसादं विना— "न तर्कशब्दविज्ञानान्नाचाराद् वेदपाठनात्।"[10] "न ध्यानान्न जपाल्लीनः... सगुरोः करुणां विना।"[11] सिद्धसिद्धान्तपद्धत्यां तर्कशास्त्रं, व्याकरणशास्त्रं,जपः,ध्यानं, व्रतानि, वेदाध्ययनं चापि गुरुकृतेः विना परमपदप्राप्तौ निष्फलतां प्राप्नुवन्तीति स्पष्टं प्रतिपादितम्। अयमेव भावः श्रीमद्भगवद्गीतायां दृश्यते— "अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते। तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः॥"[12] अत्र श्रवणं (गुरुवचनश्रवणं) एव अज्ञानतिमिरं छित्वा मृत्युतरं करोति सूचितम्। गुरोः प्रसादेन एव परमं पदं लभ्यते इति सिद्धसिद्धान्तपद्धत्यां यथा— "कथनाच्छक्तिपाताद्वा यद्वा पादावलोकनात्। प्रसादात् स्वगुरोः सम्यक् प्राप्यते परमं पदम्॥[13] सिद्धसिद्धान्तपद्धत्याः एक अत्यन्त महत्त्वपूर्ण श्लोकः अस्ति, यः दर्शयति यत् परं पदं (मोक्षः, कैवल्यम् वा) केवलं स्वगुरोः कृपया, शक्ति-संप्रेषणेन, अथवा उपदेशामृतेन प्राप्तुं शक्यते। अयं सिद्धान्तस्य श्रीमद्भगवद्गीतायाः श्लोकेन सह समन्वयः यथा— सिद्धसिद्धान्तपद्धत्याः गुरुकृपामूलक मोक्षोपायस्य गीता-संमतिः १. कथनात्— (उपदेशेन) सिद्धसिद्धान्तपद्धतेः— "कथनात्...", अर्थात् गुरुशब्दोपदेशेन मोक्षमार्गसिद्धिः। गीता अपि उपदेशस्य महत्त्वं प्रतिपादयति— "ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः। यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते॥"[14] भगवान् स्वयम् अर्जुनाय ज्ञानं ददाति यः शिष्याय मोक्षमार्गदर्शकः भवति। ज्ञानोपदेशेन आत्मतत्त्वबोधः सम्पद्यते। २. शक्तिपातेन— (गुरुशक्तिसंप्रेषणेन) श्लोकस्य "शक्तिपाताद्वा" इत्यनेन सूचितं यत् गुरु आत्मिकं शक्ति शिष्ये आरोपयति। श्रीमद्भगवद्गीता अपि— "तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता" ॥[15]

अत्र श्रीकृष्णः आत्मभावस्थः सन, दिव्यज्ञानरूपेण तमः नाशयति— अयं शक्तिपातः नितरां सन्निकृष्टः। एषा भगवानस्य कृपारूपिणी शक्ति शिष्ये आरोपिता। ३. पादावलोकनात् -(गुरु-दृष्टिपातेन) श्लोकस्य "पादावलोकनात्" इत्यर्थः गुरुणा करुणामयी दृष्ट्या शिष्ये कृपा पातः। श्रीमद्भगवद्गीता अपि अर्जुनस्य पूर्णशरणागतेः उत्तररूपेण भगवानस्य दृष्टिकृपां प्रकटयति— "शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्[16] — इत्युक्तत्वा, भगवान् अर्जुनाय दृष्टि समर्प्य युद्धमार्गे तं स्थापितवान्— "सञ्जय उवाच— एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तप। न योत्स्य इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह" ॥[17] ततः हृषीकेशः स्वदृष्ट्या तं जागरूकयति। ४. स्वगुरोः प्रसादात् —(केवलकृपया) सिद्धपद्धत्याम् —"प्रसादात् स्वगुरोः सम्यक् प्राप्यते परमं पदम्" — इत्युक्तम्। श्रीमद्भगवद्गीता अपि स्पष्ट करोति— "न हि ज्ञानेन सदृशं

पवित्रमिह विद्यते। तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति"॥[18] एवं च —"अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्"॥[19] भगवान् स्वयं कथयन्ति यत् यदि भक्तजनाः अनन्यभावेन मां भजन्ति, तर्हि तेषां योगक्षेमं अहमेव वहामि। एषा एव परं गुरोः कृपा स्वरूपा वाणी इति द्रष्टव्या। गुरुकृपा एव अष्टपाशविमोचिनी — "करुणाखड्गपातेन छित्वा पाशाष्टकं शिशोः। सम्यगानन्दजनकः सगुरुः सोऽभिधीयते"॥[20] शिष्यस्य जन्म-मरण-जरा-व्याधि-काम-क्रोध-अहङ्कार-अविद्येति अष्टपाशान् छित्वा येन आनन्दस्वरूपे प्रतिष्ठापना क्रियते,स एव सच्चिन्मयानन्दस्वरूपः सद्गुरुः। श्रीमद्भगवद्गीतायां भगवतः श्रीकृष्णेन अर्जुनस्य मोहं भग्नं कृत्वा आत्मस्वरूपे प्रतिष्ठापनं कृतम्— "अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।"[21] इत्यादिना आरभ्य "नष्टो मोहः स्मृतिर्लब्धा"[22] इत्यन्तं यावत्। गुरुः एव परब्रह्मस्वरूपः — "निमिषार्धपाताद्वा दृक्पातावलोकनात्। स्वात्मानं स्थिरमाधत्ते तस्मै श्रीगुरवे नमः"॥[23] "नानाविकल्पविश्रान्ति कथया कुरुते तु यः। सद्गुरुः स तु विज्ञेयो न तु मिथ्याविडम्बकः"॥[24] यः केवलं उपदेशेन वा अनुग्रहमयीया दृष्ट्या वा शिष्यं निजस्वरूपे प्रतिष्ठापयति, स एव सच्चिदानन्दघनः सद्गुरुः। श्रीमद्भगवद्गीतातः — "अहं आत्मा गुडाकेश सर्वभूताशयस्थितः"।[25] "सर्वधर्मान् परित्यज्य मामेकं शरणं ब्रज"।[26] इत्यादिना भगवतः श्रीकृष्णस्य गुरुतत्त्वं परब्रह्मस्वरूपं स्पष्टं दृश्यते। उभयोः ग्रन्थयोः गुरुतत्त्वसमन्वयात्मकसारणी— विषयः श्रीमद्भगवद्गीता सिद्धसिद्धान्तपद्धतिः समन्वयः।

श्रीकृष्णः अर्जुनस्य साक्षात् गुरुरूपेण प्रकटः- "शिष्येस्तेऽहं शाधि मां त्वां पपन्नम्"[27] आदिनाथ: साक्षात् शिवरुपेण गुरः— "आदिनाथं नमस्कृत्य शाक्तियुक्तं जगद्गुरुम्"[28] उभयत्र गुरु परमकारणस्वरुप:, मार्गदर्शकश्च,आत्मसाक्षात्कारस्य हेतुर्भवति। ज्ञानोपदेशस्य उपाय: "तद्विद्धिप्रणिपातेन परिप्रश्नेन सेवया..."[29] "तज्ज्ञेयं सगुरोर्वक्रात् नान्यथा शास्त्रकोटिभिः"।[30] गुरुमुखेन निष्पन्नं ज्ञानमेव मोक्षसाधनं, न केवलं पठनं पर्याप्तम्। गुरुशक्तेः संप्रेषणम "तेषामेवानुकम्पार्थम् अहं ... ज्ञानदीपेन भास्वता"[31] "कथनाच्छक्तिपाताद्वा यद्वा पादावलोकनात्...."[32] "ज्ञानरूपेण वा शक्तिपातरपेण गुरुशक्तेः शिष्ये आरोपणं मोक्षमार्गे सहायकम्। गुरुकृपया मोक्षः "अनन्याश्चिन्तयन्तो मां .... योगक्षेमं वहाम्यहम्"[33] "प्रसादात् स्वगुरोः सम्यक् प्राप्यते परमं पदम्"[34] केवल गुरुकृपया,भगवतः कृपया वा, मोक्षप्राप्तिः सम्भवति । गुरुः ब्रह्मस्वरुपः "अहम् आत्मा गुडाकेश सर्वभूताशयः स्थितः"[35] "स्वात्मानं स्थिरमाधत्ते तस्मै श्रीगुरवे नमः"[36] श्रीकृष्ण एव परब्रह्मस्वरूपः गुरुः, सिद्धपद्धत्यामपि गुरु ब्रह्मस्वरूपः—आत्मप्राप्तेः हेतुः। सर्वसाधनानाम् अपूर्णता गुरुवर्जिते "अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते...."[37] "न तर्कशब्दविज्ञानात् ... न ध्यानान्न जपाल्लीनः ... सगुरोः करुणां विना।"[38] श्रवण, मनन, ध्यानं च गुरुप्रसादं विना अपूर्णानि, ज्ञानस्य पूर्णता गुरो अनुग्रहात् भवति। मार्गः ज्ञानयोगः, कर्मयोगः, भक्तियोगः,[39] हठयोगः, राजयोगः,"स्वेच्छो योगी स्वयं कर्ता..."[40] "हंसोच्चारणाजीवब्रह्मणोरैक्य-भावनात्"[41] वहुविधा योगपद्धतयः यथा ज्ञानयोगः, भक्तियोगः, हठयोगः, राजयोगश्च सन्ति। गुरुकृपयाः फलम् मोहभङ्गः, स्थितप्रज्ञता— "नष्टो मोहः स्मृतिर्लब्धा"।[42] "स्थितप्रज्ञस्तदुच्यते"[43] पाशविमोचनं, अजरत्वम्— "छित्वा पापाष्टकं शिशोः[44]... अजरः अमरः"[45] मोहविनाशः पाशमुक्तिः, स्थितप्रज्ञता, अजरत्वं च गुरुकृपायाः फलानि। गुरुलक्षणं ज्ञानी, त्वदर्शी—"तत्त्वदर्शिनः"[46] "बुद्धियुक्तो....विमुक्तः"[47] स्वसंवेद्यतत्त्वप्रकाशकः— "वाड्यात्राद्वाथदृक्पातात.... प्रस्फुटं शाम्भवं वेद्यं"[48] "सद्गुरुः सोऽभिधियते"[49] ज्ञानी, कृपालु, दृष्टिपातेन ज्ञानप्रदाता— अयमेव सच्चिदनन्दमयः सद्गुरुः।

**उपसंहारः —**

अतः स्पष्टं दृश्यते यत् श्रीमद्भगवद्गीताया-सिद्धसिद्धान्तपद्धत्यां गुरुतत्त्वं मोक्षप्राप्तः परमोपायः रूपेण निरूपितम्। गीता भगवतः श्रीकृष्णस्य वाणीमाध्यमेन आत्मबोधमार्गे गुरोः उपदेशस्य, करुणायाः च महत्त्वं प्रतिपादयति, यथा अर्जुनः आत्मविस्मृत्य मोहग्रस्तः सन् गुरुवाक्यप्रभावेण आत्मस्वरूपे प्रतिष्ठितः जातः। एवं हि सिद्धसिद्धान्तपद्धत्याम् अपि नाथपरम्परायां गुरुः न केवलमुपदेशकर्ता अपि तु ब्रह्मस्वरूपः, शक्तिपातदाता, करुणासिन्धुः च स्वीकृतः। तत्र उपदिष्टं यत् कथनात्, शक्तिपातात, पादावलोकनात्, स्वगुरोः प्रसादात् वा परमं पदं लभ्यते, इत्येतत् भगवद्गीतायां प्रतिपादितं गुरुप्रसादमूलकं ज्ञानमार्गं पूर्णतया अनुमोदयति। अतः गुरुतत्त्वं न केवलं पारम्परिक शिक्षासूत्रं, किन्तु मोक्षोपायः, ब्रह्मज्ञानस्य द्वारं च श्रेयःपथस्य आधारशिलायाः तुल्यमेव। गीतासिद्धान्तः सिद्धसिद्धान्तपद्धतेः च मन्तव्यस्य साहचर्यं प्रमाणयति। अस्मात् समन्वयात्मकदृष्ट्या गुरुतत्त्वं भारतीयदर्शने सर्वश्रेष्ठं, सर्वोत्कृष्टं च तत्त्वं रूपेण स्थिरीकृतम्।

## Endnotes

1. श्रीमद्भगवद्गीता – 2.7
2. तत्रैव – 4.34
3. सिद्धसिद्धांतपद्धतिः- 1/1
4. तत्रैव – 5/65
5. मुण्डकोपनिषद् – 1/2/12
6. तैत्तिरीयोपनिषदि शिक्षावल्लीः – 1/11/2
7. योगसूत्रम् – 1.26
8. सिद्धसिद्धान्तपद्धतिः – 5/31
9. श्रीमद्भगवद्गीता – 4/34
10. सिद्धसिद्धान्तपद्धतिः – 5/31
11. तत्रैव – 33-35
12. श्रीमद्भगवद्गीता – 13/24-25
13. सिद्धसिद्धान्तपद्धतिः – 5/65
14. श्रीमद्भगवद्गीता – 7.2
15. तत्रैव – 10/11
16. तत्रैव – 2.7
17. तत्रैव – 2.9
18. तत्रैव – 4/38
19. तत्रैव – 9.22
20. सिद्धसिद्धान्तपद्धतिः 05/68
21. श्रीमद्भगवद्गीतायाः 2/11
22. श्रीमद्भगवद्गीतायाः 18/73
23. तत्रैव – 05/69
24. तत्रैव – 05/70
25. श्रीमद्भगवद्गीता-10/20
26. तत्रैव – 18/66
27. श्रीमद्भगवद्गीता 2/7
28. सिद्धसिद्धान्तपद्धति 1/1
29. श्रीमद्भगवद्गीता 4/34
30. श्रीमद्भगवद्गीता 5/31
31. श्रीमद्भगवद्गीता 10/11
32. सिद्धसिद्धान्तपद्धति 5/65
33. श्रीमद्भगवद्गीता 9/22
34. सिद्धसिद्धान्तपद्धति 5/65
35. श्रीमद्भगवद्गीता 10/20
36. सिद्धसिद्धान्तपद्धति 5/69
37. श्रीमद्भगवद्गीता 13/26
38. सिद्धसिद्धान्तपद्धति 5/31,33,35
39. श्रीमद्भगवद्गीता (10/12-16) (8/28)
40. सिद्धसिद्धान्तपद्धति 5/33
41. तत्रैव 5/32
42. श्रीमद्भगवद्गीता 18/73
43. तत्रैव 2/56
44. सिद्धसिद्धान्तपद्धति 5/68
45. तत्रैव 5/33
46. श्रीमद्भगवद्गीता 4/34
47. तत्रैव 5/28
48. सिद्धसिद्धान्तपद्धति 5/67
49. तत्रैव 5/68

## Bibliography


- Gambhirananda, Swami, translator. *Bhagavadgītā: With the Commentary of Śaṅkarācārya*. Advaita Ashrama, 1984.
- Gharote, M. L., and G. K. Pai, editors. *Siddhasiddhāntapaddhati of Gorakṣanātha*. Lonavla Yoga Institute, 2005.
- Kuvalayananda, Swami, and S. A. Shukla, editors. *Gorakṣaśatakam*. Kaivalyadhama S.M.Y.M. Samiti, 2006.
- Lorenzen, David N. *The Kāpālikas and Kālāmukhas: Two Lost Śaivite Sects*. 2nd ed., Manohar Publications, 1991.
- Prasad, Rama, translator. *Patañjali's Yoga Sūtras*. Munshiram Manoharlal Publishers, 1982.
- Sinh, Pancham, translator. *The Haṭha Yoga Pradīpikā*. Panini Office, 1915. Munshiram Manoharlal, 1992.
- Vasu, Srisa Chandra, translator. *The Gheraṇḍa Saṃhitā*. Theosophical Publishing House, 1895.


——